श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - १७

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - १७

*ध्रुवचरितवर्णनम्*

उत्तानपादनृपतेर्मनुनन्दनस्य
जाया बभूव सुरुचिर्नितरामभीष्टा।
अन्या सुनीतिरिति भर्तुरनादृता सा
त्वामेव नित्यमगतिः शरणं गताऽभूत्॥ १ ॥

अङ्के पितुस्सुरुचिपुत्रकमुत्तमं तं
दृष्ट्वा ध्रुवः किल सुनीतिसुतोऽधिरोक्ष्यन्।
आचिक्षिपे किल शिशुः सुतरां सुरुच्या
दुस्सन्त्यजा खलु भवद्विमुखैरसूया॥ २ ॥

त्वन्मोहिते पितरि पश्यति दारवश्ये
दूरं दुरुक्तिनिहतः स गतो निजाम्बाम्।
साऽपि स्वकर्मगतिसन्तरणाय पुंसां
त्वत्पादमेव शरणं शिशवे शशंस॥ ३ ॥

आकर्ण्य सोऽपि भवदर्चननिश्चितात्मा
मानी निरेत्य नगरात् किल पञ्चवर्षः।
सन्दृष्टनारदनिवेदितमन्त्रमार्गः
त्वामारराध तपसा मधुकाननान्ते॥ ४ ॥

ताते विषण्णहृदये नगरीं गतेन
श्रीनारदेन परिसान्त्वितचित्तवृत्तौ।
बालस्त्वदर्पितमनाः क्रमवर्धितेन
निन्ये कठोरतपसा किल पञ्चमासान्॥ ५ ॥

तावत्तपोबलनिरुच्छ्वसिते दिगन्ते
    देवार्थितस्त्वमुदयत्करुणार्द्रचेताः।
त्वद्रूपचिद्रसनिलीनमतेः पुरस्ता-
    दाविर्बभूविथ विभो गरुडाधिरूढः॥ ६ ॥

त्वद्दर्शनप्रमदभारतरङ्गितं तं
    दृग्भ्यां निमग्नमिव रूपरसायने ते।
तुष्टूषमाणमवगम्य कपोलदेशे
    संस्पृष्टवानसि दरेण तथाऽऽदरेण॥ ७ ॥

तावद्विबोधविमलं प्रणुवन्तमेन-
    माभाषथास्त्वमवगम्य तदीयभावम्।
राज्यं चिरं समनुभूय भजस्व भूयः
    सर्वोत्तरं ध्रुव पदं विनिवृत्तिहीनम्॥ ८ ॥

इत्यूचिषि त्वयि गते नृपनन्दनोऽसा-
    वानन्दिताखिलजनो नगरीमुपेतः।
रेमे चिरं भवदनुग्रहपूर्णकामः
    ताते गते च वनमादृतराज्यभारः॥ ९ ॥

यक्षेण देव निहते पुनरुत्तमेऽस्मिन्
    यक्षैः स युद्धनिरतो विरतो मनूक्त्या।
शान्त्या प्रसन्नहृदयाद्धनदादुपेतात्
    त्वद्भक्तिमेव सुदृढामवृणोन्महात्मा॥ १० ॥

अन्ते भवत्पुरुषनीतविमानयातो
    मात्रा समं ध्रुवपदे मुदितोऽयमास्ते।
एवं स्वभृत्यजनपालनलोलधीस्त्वं
    वातालयाधिप निरुन्धि ममामयौघान्॥ ११ ॥

**********



www.prapatti.com